# महाभाष्यानुसारं व्याकरणशास्त्राध्ययनस्य प्रयोजनम्

**नवराजपाण्डेयः**

*प्राध्यापकः, नेपालसंस्कृतविश्वविद्यालयः, विश्वविद्यालयविद्यापीठम्*

navrajpandey048@gmail.com

Orcid : https://orcid.org/0009-0002-4878-2964

https://doi.org/10.3126/anveshana.v4i1.96917

**लेखसारः :**

*आलेखोऽयं व्याकरणशास्त्राध्ययनप्रयोजनविवेचने केन्द्रितोऽस्ति। लेखश्चायं गुणात्मकस्वरूपे संरचितः। अत्र व्याकरणमहाभाष्यादि-ग्रन्थेभ्यो व्याकरणशास्त्राध्ययनप्रयोजनसम्बद्धाः तथ्यरूपाः सामग्रीः सङ्कलय्य तासां वर्णनं, विश्लेषणञ्च कृत्वा निष्कर्षणं कृतम्। अतोऽस्मिन् मूलतो वर्णनात्मको विश्लेषणात्मकश्चाध्ययनविधिरवलम्बितोऽस्ति। स्वाभिप्रायाभिव्यक्तये परिष्कृतभाषाप्रयोगाय काव्यशास्त्रादीनां ज्ञानाय च व्याकरणशास्त्रस्यापरिहार्यताप्रदर्शनोद्देश्येन निर्मितेऽस्मिन्ननुसन्धानात्मकालेखे व्याकरणशास्त्राध्ययनस्य किं प्रयोजनम् ? पतञ्जलि-मुनिविरचित-व्याकरण-महाभाष्यदिशा व्याकरणशास्त्राध्ययनस्य कति प्रयोजनानि निर्दिष्टानि सन्ति ? तानि च कानि ? कथञ्च महाभाष्यकृता तेषां विवेचनं विहितं वर्तते ? इत्यादिपृच्छातृषावतां विविदिषूणां जिज्ञासाशमनाय व्याख्या- विश्लेषणात्मकविधिना पुस्तकालयीयविधिमवलम्ब्य समुपलब्ध-सामग्रीणामुचित-प्रयोगपूर्वकं महाभाष्यदिशा विविधमन्त्र-श्लोककथात्मक-दृष्टान्तोदाहरण-प्रदर्शनपूर्वकं व्याकरणशास्त्राध्ययनस्य प्रयोजनविवेचनाय प्रयासो विहितो वर्तते। आलेखेऽस्मिन् महाभाष्यादिविविधग्रन्थानां परिशीलनेन व्याकरण-शास्त्राध्ययनस्य प्रयोजनविषयकः सिद्धान्तपक्षश्च प्रतिपादितो वर्तते। साधुशब्दज्ञानस्य साक्षात्प्रयोजनत्वं, रक्षोहागमलघ्वसन्देहानां मुख्यप्रयोजनत्वं, तेऽसुरा इत्यादित्रयोदशानां गौणप्रयोजनत्वं, विशालसंस्कृतवाङ्मयस्य सम्यग्ज्ञानं तद्रक्षणञ्चापि व्याकरण-शास्त्राध्ययनस्य प्रयोजनमिति निष्कर्षोऽत्र स्थापितोऽस्ति। अनेन गवेषणात्मकालेखेन महाभाष्यदिशा व्याकरणशास्त्राध्ययनस्य प्रयोजनविषयक-निष्कर्षज्ञानाय जिज्ञासूनां सौकर्यं भवेदित्याशासे।*

**शब्दकुञ्जी** : प्रयोजनम्, सौकर्यम्, मूर्धन्यम्, प्रायश्चित्तीयाः, निरामयाः।

## विषयपरिचयः

व्याकरणशास्त्रं वर्णविज्ञानेन सह पदसाधुत्वविधिपूर्वकं वाक्यप्रयोगपद्धतिनिदर्शनद्वारा सर्वेषां शास्त्राणामर्थबोधकत्वात् सकलशास्त्रेषु मूर्धन्यं वेदस्य मुखस्थानीयं च वर्तते। प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्तते, इति पौरस्त्यसिद्धान्तानुसारं सर्वेषां शास्त्राणामध्ययनस्य किमपि प्रयोजनं भवत्येव। तथैव व्याकरणशास्त्रस्याध्ययनस्यापि

प्रयोजनं वर्तत एव। तस्मादत्र व्याकरण-शास्त्राध्ययनस्य किं प्रयोजनमिति जिज्ञासाशमनाय महाभाष्यादिग्रन्थपरिशीलनपूर्वकं व्याकरण-शास्त्राध्ययनस्य प्रयोजनविषये पूर्वाचार्यैः प्रतिपादितसिद्धान्तानुसारं निष्कर्षस्थापनाय पूर्वकार्यसमीक्षणपूर्वकं विश्लेषणं क्रियते।

त्रिमुनिव्याकरणस्य महाधिकारवता भगवता पतञ्जलिना सकलशास्त्रकवलीकृते व्याकरणमहाभाष्ये व्याकरणशास्त्राध्ययनस्य प्रत्यक्षतोऽप्रत्यक्षतो वा त्रिविधप्रयोजनान्युक्तानि। तेषाञ्च– साक्षात्प्रयोजनम्, मुख्यप्रयोजनानि, गौणप्रयोजनानीति विभागः क्रियते।

असाधुशब्देभ्यः पृथक्कृत्य साधुशब्दज्ञानं व्याकरणाध्ययनस्य साक्षात्प्रयोजनं वर्तते। एतच्च व्याकरणमहाभाष्यस्यादौ अथ शब्दानुशासनम् इति प्रतिज्ञावाक्येन साधव एव शब्दा लोके प्रयोक्तव्या नासाधव इति ध्वन्यते। यद्यपि लोकव्यवहारसञ्चालनार्थं जना अपभ्रंशानामपि प्रयोगं कुर्वन्ति, अर्थज्ञानं तु तैरपि भवत्येव साधुशब्दवदपभ्रंशा अपि साक्षादर्थस्य वाचका भवन्ति तथापि साधुशब्दप्रयोगेण अर्थबोधेन सह इहाभ्युदयप्राप्तिः परत्र निःश्रेयससिद्धिश्च भवति। अत एव अभीष्टार्थप्रत्ययार्थं दृष्टादृष्टपुण्यलाभार्थञ्च साधुशब्दः प्रयोज्यो नापभ्रंशः।

सामान्यतया लोके यस्याः कस्या अपि भाषाया ज्ञानार्थं तस्या अवयवभूतानां वर्णानां पदानां वाक्यप्रयोगविधीनां ज्ञानार्थमेव व्याकरणस्याध्ययनं कर्तव्यं तत्प्रयोजनं च तथा भवति। संस्कृतभाषायाः सम्यग्ज्ञानकरणं संस्कृतव्याकरणाध्ययनस्य प्रयोजनं भवतीति ज्ञायते तथापि भगवता पतञ्जलिना महाभाष्ये व्याकरणशास्त्राध्ययनस्य पञ्च मुख्यप्रयोजनानि प्रतिपादितानि सन्ति।

तानि च 'रक्षोहागमलघ्वसन्देहाः प्रयोजनम्'। १. रक्षा, २.ऊहः, ३.आगमः, ४.लघुः, ५.असन्देह इति पञ्च मुख्यप्रयोजनानि सन्ति। तथैव व्याकरणशास्त्राध्ययनस्य त्रयोदश गौणप्रयोजनानि च भगवता पतञ्जलिना महाभाष्ये इत्थं दर्शितानि सन्ति–

१. तेऽसुराः, २. दुष्टः शब्दः, ३. यदधीतम्, ४. यस्तु प्रयुङ्क्ते, ५. अविद्वांसः, ६. विभक्तिं कुर्वन्ति, ७. यो वा इमाम्, ८.चत्वारि, ९. उत त्वः, १०. सक्तुमिव, ११. सारस्वतीम्, १२. दशम्यां पुत्रस्य, १३. सुदेवो असि वरुण इति। अस्मिन्नालेखे च महाभाष्यदिशा एतेषां विश्लेषणपूर्वकं प्रमाणनिकषैः सत्यापनपुरःसरं निष्कर्षप्रतिपादनाय प्रयासो विहितो वर्तते। एतेन व्याकरणशास्त्राध्ययनस्य प्रयोजनज्ञान-विषयिणी जिज्ञासा शमयिष्यति।

## अध्ययनस्य प्रमुखाः समस्याः

शब्दसाधुत्वसम्पादकत्वाद् व्याकरणशास्त्रं सकलशास्त्रेषु प्रधानम्। सकलज्ञाननिधेः वेदस्य षडङ्गेषु मुखस्थानीयं व्याकरणम्। यस्य कस्यापि शास्त्रस्याध्ययनस्य प्रयोजनं भवति। एतदालेखसम्बद्धा व्याकरणशास्त्राध्ययनस्य प्रयोजनविषयिण्य एताः समस्याः सन्ति।

क) व्याकरणशास्त्राध्ययनस्य प्रयोजनं किम् ?

ख) महाभाष्यानुसारं व्याकरणशास्त्राध्ययनस्य कति प्रयोजनानि निर्दिष्टानि, कानि च तानि ?

ग) कथं च तेषां विश्लेषणम् ? इति ।

## अध्ययनस्योद्देश्यम्

क) व्याकरणशास्त्राध्ययनस्य प्रयोजनप्रदर्शनम् ।

ख) महाभाष्यानुसारं व्याकरणशास्त्राध्ययनस्य प्रयोजनसंख्या प्रदर्शनम् ।

ग) व्याकरणशास्त्राध्ययनस्य प्रयोजनानां विश्लेषणप्रकारप्रदर्शनम् ।

## पूर्वकार्यसमीक्षणम्

प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्तते इत्युक्त्यनुसारं कस्यापि शास्त्रस्याध्ययनस्य प्रयोजनं भवत्येव। व्याकरण-शास्त्राध्ययनस्यापि महत्त्वपूर्णं प्रयोजनमस्ति। अनुबन्धचतुष्टये च विषयानन्तरं प्रयोजनस्य द्वितीयं स्थानं वर्तते। प्रयोजनं विना शास्त्रस्यौचित्यविषये प्रश्नः समायाति। व्याकरणाध्ययनस्य विषये पूर्वाचार्यैः संक्षिप्ततया प्रतिपादितं भवेत्, किन्तु महाभाष्यकृता पतञ्जलिना एतद्विषये रक्षोहागमलघ्वसन्देहाः प्रयोजनम् इत्यादिशब्दैः स्पष्टतया व्याकरणशास्त्राध्ययनस्य प्रयोजनं प्रतिपादितं वर्तते। तदाधारेणान्यैरपि प्रयोजनविषये प्रतिपादितम्, परं महाभाष्यमेव व्याकरणाध्ययनस्य प्रयोजनप्रतिपादनाय सफलं वर्तते। भर्तृहर्यादिभिरपि तदाधारेण प्रतिपादितम्। अत्र च महाभाष्यानुसारं व्याकरणशास्त्राध्ययनस्य प्रयोजनं विश्लेषणदृष्ट्या विविच्यते।

## अध्ययनविधिः

पदसाधुत्वसम्पादकस्य व्याकरणशास्त्रस्याध्ययने किं प्रयोजनमिति प्रश्नात्मकसमस्यायाः समाधानाय विश्लेषणात्मकविधिना सिद्धान्तो निष्कर्षरूपेण स्थापितो वर्तते। अध्ययनस्यास्य सौविध्याय सामग्रीसङ्कलनाय च विशेषरूपेण पुस्तकालयीयाध्ययनविधिरत्रा-वलम्बितो वर्तते। विशेषतया अस्याध्ययनस्य सत्यापनपूर्वकं निष्पादनाय एपिएपद्धतिरङ्गीकृता वर्तते।

## अनुसन्धानप्रकारः

अनुसन्धानप्रकारेषु मध्ये एतदनुसन्धानं व्याकरणमहाभाष्यदिशा विहितत्वात् अनुप्रयुक्तानुसन्धानं वर्तते। एतच्च विवरणविश्लेषणदृष्ट्या गुणात्मकमनुसन्धानमिति च तत्प्रकारेषु निश्चेतुं शक्यते।

## अध्ययनस्य क्षेत्रं सीमाङ्कनञ्च

संस्कृतभाषायाः पदानां साधुत्वसम्पादकस्य व्याकरणशास्त्रस्य अध्ययनप्रयोजनप्रतिपादनाय मुख्यत्वेन व्याकरणमहाभाष्यमन्ये च सहयोगिनो ग्रन्था अस्यानुसन्धानात्मकाऽऽलेखस्य विषयविश्लेषणप्रसङ्गे क्षेत्रत्वेन स्वीकृतास्तदतिरिक्तविषयेषु प्रवृत्यभाव सीमेति सुस्पष्टमेव।

## सामग्रीसङ्कलनम्

आलेखेऽस्मिन् मुख्यतया पुस्तकालयीयविधिमनुसृत्य विहितमिदमध्ययनम्। अत्र च व्याकरणशास्त्राध्ययनस्य प्रयोजनविवेचनप्रसङ्गे महाभाष्यादयो ग्रन्थाः प्रमुखसामग्रीत्वेन प्रयुक्ता वर्तन्ते।

## सैद्धान्तिकः पर्याधारः

सैद्धान्तिकाधारं विना किमप्यनुसन्धानं निरर्थकं भवति। शोधलेखोऽसौ व्याकरणविषयसम्बद्धो वर्तते। व्याकरणशास्त्राध्ययनस्य प्रयोजनविवेचनमस्यालेखस्य विषयो वर्तते। अतो व्याकरणशास्त्रमेव अस्याध्ययनस्य सैद्धान्तिकाधारो विद्यते। व्याकरणविषयसम्बद्धान् शास्त्रीयग्रन्थान् मुख्यतो व्याकरणमहाभाष्यग्रन्थमाधारीकृत्य विषयोपस्थापनं विषयविश्लेषणं निष्कर्षोपस्थापनं चात्र विहितमस्ति। व्याकरणमहाभाष्यं तदनुयायिनो वचनानि तेषां सिद्धान्तश्च अस्याध्ययनस्य सैद्धान्तिकः पर्याधारो वर्तते।

## विषयविश्लेषणम्

व्याक्रियन्ते व्युत्पाद्यन्ते शब्दा अनेन इति विग्रहे वि, आङ्इत्युपसर्गद्वयपूर्वकात् करणार्थकात् 'डुकृञ्' इति धातोः करणेऽर्थे 'करणाधिकरणयोश्च' (अ.सू. ३/३/११७) इति सूत्रेण ल्युट् प्रत्ययेऽनुबन्धलोपे यु इत्यस्य युवोरनाकौ' (अ.सू. ७/१/१) इत्यनादेशेन निष्पन्नो व्याकरणशब्दः। वैयाकरणसम्प्रदाये अस्यैव पर्यायवाची शब्दानुशासनशब्दः प्रयुज्यते। यथा–

'अथ शब्दानुशासनम्' (पतञ्जलिः, २०४०, पृ.३) तस्य व्युत्पत्तिरपि व्याकरणशब्देन सदृशी एव। अनुशिष्यन्ते अपशब्देभ्यः पृथक्कृत्य साधुशब्दा विविच्यन्ते अनेन इति विग्रहे करणे पूर्ववत् ल्युटि अनादेशे अनुशासनम् इति। शब्दानामनुशासनं शब्दानुशासनम्, अत्र इध्मप्रव्रश्चनवत् 'कृद्योगा च षष्ठी समस्यत इति वाच्यम्' (वा. १३१७, वैयाकरणसिद्धान्तकौमुदी,पृ.१३८) इति वार्तिकेन समासो भवति।

विश्वस्मिन् अद्यतनविद्यमानानां भाषाणां मध्ये सर्वप्राचीना सृष्टेरादौ सर्वव्यवहारसञ्चालनार्थं ब्रह्मणः सकाशात् समुद्भूता संस्कृतभाषा एवास्ति। तथा च –

'समाहितात्मनो ब्रह्मन् ब्रह्मणः परमेष्ठिनः ।

हृद्याकाशादभून्नादो वृत्तिरोधाद् विभाव्यते ।

ततोऽभूत्त्रिवृदोङ्कारो योऽव्यक्तप्रभवः स्वराट् ।

ततोऽक्षरसमाम्नायमसृजद् भगवानजः ।

अन्तःस्थोष्मस्वरस्पर्शह्रस्वदीर्घादिलक्षणम् ।' (वेदव्यासः, २०६७, पृ.६२३) ।

'ततस्त्वोङ्कार उद्भूतो बीजं यच्छब्दब्रह्मणः ।

नारायणमुखाद् वेदाः श्वासरूपेण निर्गताः ।' (पाण्डेयः, २०६८, पृ.३८) ।

भगवतो महेश्वरस्य प्रेरणया नारायणस्य श्वासरूपेण समुत्पन्ना ज्ञाननिधयो वेदाः सन्ति ।

'यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् । निर्ममे' – (वेदभाष्यम्) ।

तथा च–

'अनादिनिधना नित्या वागुत्सृष्टा स्वयंभुवा ।

आदौवेदमयी दिव्या यतः सर्वाः प्रवृत्तयः ।' (महाभारतम्–शान्तिपर्व २३२/२४)

सृष्टेरादौ देवा अनया भाषया एव व्यवहरन्ति स्म । तत इयं देवभाषा नाम्ना प्रसिद्धा । तथा चोक्तम्–

'संस्कृतं नाम दैवीवागन्वाख्याता महर्षिभिः' ( दण्डी, काव्यादर्शः) ।

मानवसंस्काराणां मूलभूता स्वयं परिष्कृता च इत्यतः संस्कृतभाषेति नाम्ना विश्वस्मिन् प्रथिता ।

संसारे यदि भाषा नाभविष्यत् तर्हि सकलं जगदन्धकारमयमभविष्यत् । उक्तं च–

'इदमन्धं तमः कृत्स्नं जायेत भुवनत्रयम् ।
यदि शब्दाह्वयं ज्योतिरासंसारं न दीप्यते ।' ( दण्डी, काव्यादर्शः) ।

परब्रह्म एव जगत् स्रष्टुं ॐइति शब्दब्रह्मरूपेण प्रकटीभूय त्रिगुणात्मिकां प्रकृतिं सृष्ट्वा तत्रैवानुप्राविशत् । 'तत्सृष्ट्वा तदेवानुप्राविशत्' (उपनिषद्) ।

एतत्सकलं जगत् शब्दब्रह्मणो विवर्तरूपमिति । तथा चोक्तम्–

'अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम् ।

विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः ।' (भर्तृहरिः,१९८७, पृ.१) ।

पाणिनेः पूर्वं वेदज्ञानार्थं बहुभिर्ऋषिभिः निर्मितानां प्रातिशाख्यनामकव्याकरणानामध्ययनं तथा लौकिकवाङ्मयज्ञानार्थं चेन्द्रचन्द्रादिविविध-वैयाकरणानां व्याकरणशास्त्रं पठन्ति स्म, परं पाणिनीयव्याकरणस्योदयानन्तरं नान्येषां व्याकरणानां पठनस्यावश्यकता जाता। संस्कृतभाषायाः संरक्षणाय असाधुशब्दपृथक्करणपूर्वकं साधुशब्दज्ञानाय च पाणिनेर्व्याकरणं लोकेऽद्वितीयमस्ति। उक्तं हि–

'येन धौता गिरः पुंसां विमलैः शब्दवारिभिः।

तमश्चाज्ञानजं भिन्नं तस्मै पाणिनये नमः।' (पाणिनिः, १९७८, पृ.१५)।

वेदरूपस्य शब्दब्रह्मणोऽवयवकल्पनायां मुखस्थानीयं व्याकरणशास्त्रं मन्यते–

'छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते।

ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते।

शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम्।

तस्मात् साङ्कमधीत्यैव ब्रह्मलोके महीयते।' (पाणिनिः, १९७८, पृ.११)।

यथा शरीरे मुखस्य मुख्यत्वमस्ति तथा सर्वशास्त्रेषु व्याकरणशास्त्रस्यापि मुख्यत्वं प्रमाणितमस्ति। अत एव महाभाष्ये– 'प्रधाने च कृतो यत्नः फलवान् भवति' (पतञ्जलिः, २०४०, पृ.१५) इत्युक्तम्।

लोके च व्याकरणशास्त्राध्ययनं विना अन्यशास्त्रेषु गतिर्न भवति इति विषये चोक्तम्–

यो वेद वेदवदनं सदनं हि सम्यक्

ब्राह्म्याः स वेदमपि वेद किमन्यशास्त्रम्

यस्मादतः प्रथममेतदधीत्य धीमान्

शास्त्रान्तरस्य भवति श्रवणेऽधिकारी। (सिद्धान्तशिरोमणिः, भास्कराचार्यः)

एतादृशमहिमामण्डितस्य व्याकरणशास्त्राध्ययनस्य प्रयोजनविषये महाभाष्यग्रन्थानुसारमत्र विवेचनं क्रियते।

**व्याकरणशास्त्राध्ययनस्य प्रयोजनानि**

व्याकरणशास्त्राध्ययनस्य कानि प्रयोजनानि इति जिज्ञासायामुच्यते।

संस्कृतभाषायाः सर्वपक्षीयमध्ययनं व्याकरणशास्त्रादेव भवति। व्याकरणशास्त्रेण प्रथमतो वर्णपदवाक्यसम्बद्धप्रकृतिप्रत्ययादिविवेचनपूर्वकं भाषायाः परिष्कारो भवति, अन्यतश्च व्याकरणदर्शनस्य

सिद्धान्तभूतस्फोटादितत्त्वानां ज्ञानपूर्वकमखिलब्रह्माण्डस्य बीजभूतस्य शब्दब्रह्मणः सूक्ष्मतत्त्वमवगम्य परब्रह्मप्राप्तिर्भवति। तथा च –

'द्वे ब्रह्मणी वेदितव्ये शब्दब्रह्म परं च यत्।

शब्दब्रह्मणि निष्णातः परं ब्रह्माधिगच्छति ।'(वेदव्यासः, २०७२, पृ.७२९)।

'इदमाद्यं पदस्थानं सिद्धिसोपानपर्वणाम्।

इयं सा मोक्षमाणानामजिह्मा राजपद्धतिः।' (भर्तृहरिः, १९८७, पृ.२५)।

महामुनिपतञ्जलिना व्याकरणमहाभाष्ये व्याकरणशास्त्राध्ययनस्य प्रत्यक्षतोऽप्रत्यक्षतो वा त्रिविधप्रयोजनान्युक्तानि। तेषाञ्च– साक्षात्प्रयोजनम्, मुख्यप्रयोजनानि, गौणप्रयोजनानीति विभागः क्रियते।

**व्याकरणाध्ययनस्य साक्षात्प्रयोजनम्**

असाधुशब्देभ्यः पृथक्कृत्य साधुशब्दज्ञानं व्याकरणाध्ययनस्य साक्षात्प्रयोजनम्। यतो हि– 'साधुत्वज्ञानविषया सैषा व्याकरणस्मृतिः।' (भर्तृहरिः, १९८७, पृ.२६५)। साधव एव शब्दा लोके प्रयोक्तव्या नासाधवः। एतद्विषये उक्तञ्च

'सम्यग्वर्णप्रयोगेण ब्रह्मलोके महीयते' (पाणिनिः, १९७८, श्लो.३१)। यद्यपि लोकव्यवहारसञ्चालनार्थं जना अपशब्दानां (अपभ्रंशानां) प्रयोगं कुर्वन्ति, अर्थज्ञानं तु तैरपि भवत्येव साधुशब्दवदपभ्रंशा अपि साक्षादर्थस्य वाचकाः इति कैयटः। साधुशब्दप्रयोगेण अर्थज्ञानेन सह इहाभ्युदयप्राप्तिः परत्र निःश्रेयससिद्धिश्च भवति। तथाहि–

'समानायामर्थावगतौ शब्दैश्चापशब्दैश्च शास्त्रेण धर्मनियमः क्रियते।' इति भाष्यम्।

'वाचकत्वाविशेषेऽपि नियमः पुण्यपापयोः।' इति हरिकारिका च सङ्गच्छते। (भट्टः, १९९१, पृ.४३)।

अत एव अभीष्टार्थप्रत्ययार्थं दृष्टादृष्टपुण्यलाभार्थञ्च साधुशब्दः प्रयोज्यः। श्रूयते च–

'एकः शब्दः सम्यग्ज्ञातः शास्त्रान्वितः सुप्रयुक्तः स्वर्गे लोके च कामधुग्भवति, (श्रुतिः)।

**व्याकरणाध्ययनस्य मुख्यप्रयोजनानि**

महाभाष्ये व्याकरणशास्त्राध्ययनस्य पञ्च मुख्यप्रयोजनानि प्रतिपादितानि सन्ति । तानि च

'रक्षोहागमलघ्वसन्देहाः प्रयोजनम्' (पतञ्जलिः, २०४०, पृ.१३)

रक्षा, ऊहः, आगमः, लघुः, असन्देह इति पञ्च मुख्यप्रयोजनानि सन्ति।

***रक्षा***

प्रत्यक्षाप्रत्यक्षशक्तियुक्तस्य वेदस्य रक्षा ज्ञानेन एव भवति। तज्ज्ञानार्थं लोपागमवर्णविकाराणां प्रक्रिया बोद्धव्या भवति। तथा च 'रक्षार्थं वेदानामध्येयं व्याकरणम्। लोपागमवर्णविकारज्ञो हि सम्यग्वेदान् परिपालयिष्यतीति।'(पतञ्जलिः, २०४०, पृ.१३)। लोपागमवर्णविकाराणाञ्च विवेचनं क्रियते।

**लोपः** वेदेषु प्रयुक्ते परमेव्योमन् इत्यत्र 'सुपां सुलुक्पूर्वसवर्णात्..' (अ.सू. ७/१/३९) इत्यादिसूत्रेण व्योमन् शब्दात् परस्य सप्तम्या एकवचनस्य ङेर्लुग् भवति। त्मना इत्यत्र 'मन्त्रेष्वाङ्यादेरात्मनः' (अ.सू. ६/४/१४१) इति सूत्रेण आत्मन् शब्दस्य टाविभक्तौ आलोपो भवति। ता ता पिण्डानाम् इत्यत्र 'शेश्छन्दसि बहुलम्' (अ.सू. ६/१/७०) इति सूत्रेण शिलोपे नलोपे च कृते तानि तानि इत्यस्य प्रयोगस्थाने ता ता इत्यादिप्रयोगा दृश्यन्ते। व्याकरणज्ञ एव अत्रत्यं वर्णलोपं याथार्थ्यं जानाति नावैयाकरणः।

**आगमः** देवा अदुह्र इत्यादौ 'शीङोरुट्, बहुलं छन्दसि' (अ.सू. ७/१/८) इति सूत्रेण रुडागमो भवति।

पञ्चथम् इत्यत्र 'थट् च छन्दसि' (अ.सू. ५/२/५०) इति सूत्रेण डटस्थडागमो भवति।

भवाति इत्यादौ 'लेटोऽडाटौ' (अ.सू. ३/४/९४) इति सूत्रेण आडागमो भवति। इत्थं वेदे लोकतो भिन्ना विविधा आगमा भवन्ति। एतच्च नावैयाकरणो याथार्थ्यं ज्ञातुं शक्नोति।

**वर्णविकारः** वेदे प्रयुक्तेषु गृभाय जिह्वया मधु, गृभ्णामि, जभार, उद्ग्राभं, निग्राभं इत्यादिषु 'हृग्रहोर्भश्छन्दसि' इति वार्तिकेन हृधातोर्ग्रहधातोश्च हस्य भकारादेशो भवति।

अग्निमीडे इति डकारस्य 'द्वयोश्चास्य स्वरयोर्मध्यमेत्य सम्पद्यते स डकारो लकारः' इति वैदिकनियमेन लकारो भवति। एतन्नावैयाकरणो जानाति। अतएव वेदरक्षार्थं लोपागमवर्णविकारज्ञानपूर्वकं व्याकरणाध्ययनं कर्तव्यम्।

***ऊहः***

वेदस्यापौरुषेयत्वात् तत्र क्वचित् लिंगसंख्याविभक्तीनां निर्देशो नास्ति। 'न सर्वैर्लिङ्कैर्न च सर्वाभिर्विभक्तिभिर्वेदे मन्त्रा निगदिताः।' (पतञ्जलिः, २०४०, पृ.१४)। क्वचिच्च 'व्यत्ययो बहुलम्' (अ.सू. ३/१/८५) इति सूत्रेण लिंगसंख्यापुरुषादीनां व्यत्ययो भवति। उक्तं च- 'सुप्तिङुपग्रहलिङ्गनराणां कालहलच्स्वरकर्तृयङां च।

व्यत्ययमिच्छति शास्त्रकृदेषां सोऽपि च सिध्यति बाहुलकेन।'(भट्टोजिदीक्षितः, २०७३, पृ.३४)।

मीमांसकैर्निर्दिष्टानां प्रकृतिविकृतियागादीनां मन्त्रेषु 'प्रकृतिवद् विकृतिः कर्तव्या' इति नियमपूर्वकं विभक्त्यादिसंयोजनं कर्तव्यम्। यज्ञाचार्यत्वेन वृतैः पुरुषैः समयप्रसङ्कानुसारेण सर्वं यथायथं संयोजनीयं भवति।

'ते चावश्यं यज्ञगतेन पुरुषेण यथायथं विपरिणमयितव्याः, तन्नावैयाकरणः शक्नोति यथायथं विपरिणमयितुम्, तस्मादध्येयं व्याकरणम्', (पतञ्जलिः, २०४०,पृ. १४)।

***आगमः***

फलाशारहितत्वेन निष्कामभावनया सन्ध्यावन्दनादिवत् स्वकर्तव्यं मत्वा षडङ्गवेदाध्ययनं ब्राह्मणस्य कर्तव्यत्वेन श्रुतिस्मृत्यादौ निर्दिष्टमस्ति। अत एवोक्तम्–

'ब्राह्मणेन निष्कारणोधर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्चेति। प्रधानं च षट्स्वङ्गेषु व्याकरणम्। प्रधाने च कृतो यत्नः फलवान् भवति' (पतञ्जलिः, २०४०, पृ.१५)।

पूर्वञ्च वेदस्य षडङ्गान्याख्यातानि। तेषु मुखमिव प्रधानं व्याकरणशास्त्रं सकलशास्त्राणामध्ययनाय यदि समर्थो न स्यात्, तदापि व्याकरणं तु अवश्यमेव पठितव्यमित्यत्र पौरस्त्या भणिति :–

यद्यपि बहुनाधीषे तथापि पठ पुत्र व्याकरणम्।

स्वजनः श्वजनो मा भूत् सकलं शकलं सकृच्छकृत्। (बालकृष्णाश्रमीटीका,अमरकोश–भूमिका)।

***लघुः***

अतिगम्भीरं दुष्पारञ्च संस्कृतवाङ्मयम्। चत्वारो वेदाः, उपवेदाः उपनिषदः, ब्राह्मणग्रन्थाः, स्मृतयो नैकविधाः, रामायणम्, महाभारतम्, अष्टादशपुराणानि, तावन्त्युपपुराणानि, उपौपपुराणानि, वेदस्य षडङ्गानि, बहुविधदर्शनानि, चम्पूकाव्यनाटकादिग्रन्थानां गणनापि कर्तुं न शक्यते। 'महान् शब्दस्य प्रयोगविषयः। सप्तद्वीपा वसुमती त्रयो लोकाश्चत्वारो वेदाः साङ्काः सरहस्या बहुधाभिन्ना, एकशतमध्वर्युशाखाः सहस्रवत्र्मा सामवेदः, एकविंशतिधा बाह्वृच्यं नवधाथर्वणो वेदो वाकोवाक्यम्, इतिहासः पुराणं वैद्यकमित्येतावाञ्छब्दस्य प्रयोगविषयः' (पतञ्जलिः, २०४०, पृ.५२)।

स्वल्पायुषो मानवस्य का कथा, मृत्युरहिता देवा अपि शब्दशास्त्रस्य पारं गन्तुमसक्ताः।

'इन्द्रादयोऽपि यस्यान्तं न ययुः शब्दवारिधेः।' (बालकृष्णाश्रमीटीका,अमरकोश–भूमिका)

तथाहि– 'बृहस्पतिरिन्द्राय दिव्यं वर्षसहस्रं प्रतिपदोक्तानां शब्दानां शब्दपारायणं प्रोवाच नान्तं जगाम। बृहस्पतिश्च प्रवक्ता इन्द्रश्चाध्येता दिव्यं वर्षसहस्रमध्ययनकालो न चान्तं जगाम।'(पाण्डेयः, २०७५, पृ.५७)। अन्यत्राप्युक्तम्–

अनन्तशास्त्रं बहुला च विद्या स्वल्पं तथायुर्बहवश्च विघ्नाः।

सारं ततो ग्राह्यमपास्य फल्गु हंसैर्यथा क्षीरमिवाम्बुमध्यात्। (चाणक्यनीतिः)।

अत एव– 'लध्वर्थं चाध्येयं व्याकरणम्। न चान्तरेण व्याकरणं लघुनोपायेन शब्दाः शक्या ज्ञातुम्।' (पतञ्जलिः, २०४०,पृ. १६)।

***असन्देहः***

सकलशब्दमूलका धातवोऽनेकार्थकाः, शब्दाश्चानेकार्थका भवन्ति। उक्तं च 'सति तात्पर्ये सर्वे सर्वार्थवाचका इति महाभाष्यम्' (भट्टः, १९९१, पृ.७३)। तत्रापि कृत्तद्धितप्रत्ययादिभेदेन तत्र व्युत्पत्तिभेदेन समासादिभेदेन च तेषामनेकार्थत्वं भवति। तेषां च कुत्र कस्यार्थस्य ग्रहणमिति सन्देहो भवति। यथा– 'स्थूलपृषतीमाग्निवारुणीमनड्वाहीमालभेत इति। तस्यां सन्देहः– स्थूला चासौ पृषती च स्थूलपृषती, स्थूलानि वा पृषन्ति यस्याः सेयं स्थूलपृषतीति। तां नावैयाकरणः स्वरतोऽध्यवस्यति'(पतञ्जलिः,२०४०,पृ.१७)। यदा कर्मधारयसमासो भवति तदा 'समासस्य' (अ.सू. ६/१/२२३) इति सूत्रेण अन्तोदात्तो भवति। यदा च बहुव्रीहिसमासो भवति तदा 'बहुव्रीहौ प्रकृत्या पूर्वपदम्' (अ.सू. ६/२/१) इति सूत्रेण पूर्वपदप्रकृतिस्वरो भवति। स्वरव्यत्ययाच्च ब्राह्मणयजमानयोरनिष्टोत्पत्तिर्भवति। यजमानस्यानिष्टस्योदाहरणं दुष्टः शब्दः इत्यानुषङ्गिकप्रयोजनविवेचनावसरे उदाहरिष्यते। एतच्च वैयाकरण एव निःसन्देहं जानाति नावैयाकरणः। अत एव असन्देहार्थमध्येयं व्याकरणम्।

**व्याकरणाध्ययनस्य गौणप्रयोजनानि**

व्याकरणाध्ययनस्य त्रयोदश गौणप्रयोजनानि च भगवता पतञ्जलिना महाभाष्ये इत्थं दार्शितानि सन्ति–

१. तेऽसुराः, २. दुष्टः शब्दः, ३. यदधीतम्, ४. यस्तु प्रयुङ्क्ते, ५. अविद्वांसः, ६. विभक्तिं कुर्वन्ति, ७. यो वा इमाम्, ८.चत्वारि, ९. उत त्वः, १०. सक्तुमिव, ११. सारस्वतीम्, १२. दशम्यां पुत्रस्य, १३. सुदेवो असि वरुण इति।

***तेऽसुराः***

वाक्प्रयोगकाले भाषिकी संरचना विचारणीया भवति। अपशब्दोऽनभीष्टफलदायको भवति। प्राचीनकाले केचन असुरा युद्धभूमौ हे अरयः, हे अरयः इत्युच्चारणीये हेलयो हेलय इत्यपशब्दमुच्चारितवन्तः। ते चापशब्दोच्चारणजन्यकिल्विषेण युद्धे पराभूताः। तथाहि-'तेऽसुरा हेलयो हेलय इति कुर्वन्तः पराबभूवुः।' (पतञ्जलिः, २०४०, पृ.१८)। अपशब्दान् मा प्रयुक्ष्महि इत्यध्येयं व्याकरणम्।

***दुष्टः शब्दः***

वैदिके यज्ञानुष्ठानादिकर्मणि मन्त्राणामुदात्तानुदात्तस्वरितादिस्वराणां लिंगवचनपुरुषमात्रास्वर–व्यञ्जनादीनां यथायथमुच्चारणीयम्। याज्ञे कर्मणि मन्त्रोच्चारणादौ त्रुट्या ब्राह्मणयजमानयोरनिष्टं भवति।

पुरा त्वष्टा स्वसुतस्य विश्वरूपस्य हन्तारमिन्द्रं नाशयितुं हवनात्मकमाभिचारिकं यज्ञं चकार, किन्तु तत्र प्रयुक्ते 'स्वाहेन्द्रशत्रुर्वर्धस्व' इति मन्त्रे स्वरव्यत्ययात् फलव्यत्ययो जातः। इन्द्रविनाशकामनया कृताद् यज्ञादुत्पन्नो वृत्रासुरनामा इन्द्रद्वारा मारितः। अत एवोक्तम्–

'दुष्टः शब्दः स्वरतो वर्णतो वा मिथ्या प्रयुक्तो न तमर्थमाह।

स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधात्।'(पतञ्जलिः, २०४०, पृ.१९)।

अत एव दोषयुक्तान् शब्दान् मा प्रयुक्ष्महि इत्यध्येयं व्याकरणम्।

***यदधीतम्***

यदपि शास्त्रमधीयते तदर्थज्ञानपूर्वकमध्येतव्यम्। तदेवाध्ययनं सार्थकं भवति यस्यार्थबोधो भवति न शब्दपारायणमेव। अर्थज्ञानरहितं शब्दपारायणं अग्निरहितचूल्ह्यां समित्स्थापनफूत्कारादिवदनर्थकं भवति। अत एवोक्तम्–

'यदधीतमविज्ञातं निगदेनैव शब्द्यते।

अनग्नाविव शुष्कैधो न तज्ज्वलति कर्हिचित्।

तस्मादनर्थकं माऽधिगीष्महीत्यध्येयं व्याकरणम्।'(पतञ्जलिः, २०४०, पृ.२०)।

***यस्तु प्रयुङ्क्ते***

व्याकरणशास्त्रेणैव लौकिकवैदिकशब्दानां साधुता सम्पाद्यते। लौकिकव्यवहारे तु साधुशब्दादधिकं असाधवः (अपभ्रंशाः) प्रयुज्यन्ते। एकस्यैव गौरित्यस्य शब्दस्य गावीगोणीगोतागोपोतलिका–गाई–गाय–काउ इत्यादयोऽपभ्रंशाः विविधक्षेत्रेषु भाषासु च प्रयुज्यन्ते। अर्थज्ञानं तु तथाविधशब्दादपि भवत्येव, तथापि साधुशब्देन अर्थज्ञानपूर्वकं अदृष्टं पुण्यमपि भवति, असाधुशब्दादर्थज्ञानमेव भवति नादृष्टं पुण्यम्। तथा चोक्तम्–

'समानायामर्थावगतौ शब्दैश्चापशब्दैश्च शास्त्रेण धर्मनियमः क्रियते – शब्देनैवार्थोऽभिधेयो नापशब्देनेति।' (पाण्डेयः,२०७५, पृ.७२)।

'वाचकत्वाविशेषेऽपि नियमः पुण्यपापयोः।' (वाक्यपदीयम् ३/३/३०)

'एकः शब्दः सम्यग्ज्ञातः शास्त्रान्वितः सुप्रयुक्तः स्वर्गे लोके च कामधुग्भवति।' (श्रुतिः)

याज्ञे कर्मणि अपशब्दप्रयोगो दोषाय भवति। तथा चोक्तम्–

'यस्तु प्रयुङ्क्ते कुशलो विशेषे शब्दान् यथावद् व्यवहारकाले।

सोऽनन्तमाप्नोति जयं परत्र वाग्योगविद् दुष्यति चापशब्दैः' (पतञ्जलिः, २०४०, पृ.२०)।

उपयुक्तस्थाने यथावत्साधुशब्दप्रयोगे योग्याः स्याम इत्यध्येयं व्याकरणम्।

***अविद्वांसः***

व्याकरणशास्त्राध्ययनेन मानवः परिष्कृतशिष्टशैल्या साधुशब्दप्रयोगे सक्षमो भवति। अन्यस्मृतिवद् व्याकरणस्मृतिरपि व्यावहारिकप्रयोगं निर्दिशति। यथा अभिवादनानन्तरं प्रत्यभिवादवाक्यान्ते नामगोत्रयोर्वा टेः प्लुतत्वं विधेयं भवति- 'प्रत्यभिवादेऽशूद्रे' (अ.सू. ८/२/८३)। तथा च-

'अविद्वांसः प्रत्यभिवादे नाम्नो ये न प्लुतिं विदुः।

कामं तेषु तु विप्रोष्य स्त्रीष्विवायमहं वदेत्।' (पतञ्जलिः, २०४०, पृ.२३)।

यथास्थानं यथावत्शब्दप्रयोगे योग्याः स्याम इत्यध्येयं व्याकरणम्।

***विभक्तिं कुर्वन्ति***

वैदिकयागे प्रयाजनामधेयाः केचन मन्त्रा विभक्तिनिर्देशरहिता उपदिष्टाः सन्ति। तत्र च स्थानकालप्रसंगयागकामनाद्यनुसारेण विभक्तिसंयोजनं कर्तव्यं भवति। तथाहि–

'प्रयाजाः सविभक्तिकाः कार्या इति। न चान्तरेण व्याकरणं प्रयाजाः सविभक्तिकाः शक्याः कुर्तुम्।' (पतञ्जलिः, २०४०,पृ. २३)।

***यो वा इमाम्***

वैदिकधर्मशास्त्रानुसारेण मानवो जन्मत एव पितृदेवर्षीणां ऋणी भवति। वैदिकयज्ञानुष्ठानेन च ऋणमुक्तो भवति। उक्तञ्च-

'यज्ञशिष्टामृतभुजो यान्ति ब्रह्म सनातनम्।

नायं लोकोऽस्त्ययज्ञस्य कुतोऽन्यः कुरुसत्तम।' (भगवद्गीता-४/३१)।

यज्ञादिविधौ मन्त्रोच्चारणकर्मणि यथाशास्त्रं साधूच्चारणकर्ता च यज्ञाधिकारी भवति। उक्तं च

'यो वा इमां पदशः स्वरशोऽअक्षरशश्च वाचं विदधाति स आर्त्विजीनो भवति। आर्त्विजीनाः स्याम इत्यध्येयं व्याकरणम्' (पतञ्जलिः, २०४०, पृ.२४)।

***चत्वारि***

कतिपयश्रुत्यादौ महाभाष्यादि गन्थेषु च शब्दस्य वृषभत्वारोपणं विहितमस्ति। तदनुसारेण नामाख्यातोपसर्गनिपाताः शब्दरूपवृषभस्य चत्वारि शृङ्गाणि सन्ति, भूतभविष्यद्वर्तमानकाला अस्य त्रयः पदाः

कल्पिताः। शब्दस्य नित्यानित्ये द्वे स्वरूपे शिरसी, प्रथमाद्याः सप्तविभक्तयः सप्तहस्ताः, उरसि कण्ठे शिरसि च त्रिषु स्थानेषु बद्धः शब्दवृषभो मनुष्याणामन्तः स्थित्वा शब्दं करोति। तथा चोक्तम् –

'चत्वारि शृङ्गा त्रयो अस्य पादा द्वे शीर्षे सप्त हस्तासो अस्य।

त्रिधाबद्धो वृषभो रोरवीति महोदेवो मर्त्यां आविवेश।' (पतञ्जलिः,२०४०, पृ.२४)। मन्त्रान्तरेण तस्यैव इत्थं विवेचनम्–

वाचश्चतस्रोऽवस्था भवन्ति परा, पश्यन्ती, मध्यमा, वैखरी च। तिस्रो वाचो मानवानामन्तस्तिष्ठन्ति सूक्ष्मरूपेण, तुर्या वैखरी नामधेया वाणी मानवा वदन्ति। तथा च–

'चत्वारि वाक्परिमिता पदानि तानि विदुर्ब्राह्मणा ये मनीषिणः।

गुहा त्रीणि निहिता नेङ्कयन्ति तुरीयं वाचो मनुष्या वदन्ति (पतञ्जलिः, २०४०, पृ.२६)।

वाचोऽवस्थाविवेचनमित्थम्–

'परावाङ्मूलचक्रस्था पश्यन्ती नाभिसंस्थिता।

हृदिस्था मध्यमा ज्ञेया वैखरी कण्ठदेशगा।'(भट्टः, १९९१, पृ.९४)।

परावाणी स्पन्दशून्या मूलाधारचक्रे तिष्ठति, पश्यन्ती नाभिप्रदेशे तिष्ठति, समाध्यवस्थायां योगिन एवैतयोः सूक्ष्मतामवगच्छन्ति। मध्यमावाणी हृत्प्रदेशे निवसति। कण्ठदेशादुच्चार्यमाणा वाणी वैखरीति कथ्यते। मध्यमावाण्याः कृतोनादः स्फोटात्मकशब्दब्रह्मणोऽभिव्यञ्जक इति।

'मध्यमया कृतोनादः स्फोटव्यञ्जक उच्यते।' (भट्टः, १९९१, पृ.९४)। इत्थं वाण्या अवस्थाभेदज्ञानार्थञ्च व्याकरणमध्येतव्यम्।

***उत त्वः***

वाण्याः स्वरूपं बाह्यचक्षुषा द्रष्टुं न शक्यते, न वा श्रोत्रेन्द्रियेण अस्या वास्तविकं स्वरूपं श्रोतुं शक्यते। यो विद्वान् वाण्या वास्तविकं स्वरूपं जानाति, वस्त्राभरणसुशोभिता नवोढा कामिनी जाया प्रीत्या यथा पत्यै सर्वाङ्कं ददाति तथा वाणी तं वाग्विदं आत्मनः स्वरूपं प्रकटयति। तथा चोक्तम्-

'उत त्वः पश्यन्न ददर्श वाचमुत त्वः श्रृण्वन्न श्रृणोत्येनाम्।

उतो त्वस्मै तन्वं विसस्रे जायेव पत्य उशती सुवासा।'(पतञ्जलिः, २०४०, पृ.२७)।

वाचः स्वरूपबोधार्थञ्च व्याकरणमध्येतव्यम्।

***सक्तुमिव***

चालनी यथा सक्तून् परिमृज्य तत्रस्थं तुषादिकमपाकृत्य भोजनयोग्यं विदधाति, तथा व्याकरणशास्त्रमपि असाधुशब्दान् पृथक्कृत्य साधुशब्दान् बोधयति। व्याकरणविदां वाचि कल्याणकारिणी लक्ष्मीर्वसति। तथा चोक्तम्–

'सक्तुमिव तितउना पुनन्तो यत्र धीरा मनसा वाचमक्रत।

अत्रा सखायः सख्यानि जानते भद्रैषां लक्ष्मीर्निहिताऽधिवाचि।' (पतञ्जलिः, २०४०, पृ.२८)।

परिमार्जितां वाणीं ब्रूम इत्यध्येयं व्याकरणम्।

***सारस्वतीम्***

वैदिके याज्ञे कर्मणि वृतैराचार्यैः मन्त्रोच्चारणं यथावत् शुद्धं कर्तव्यम्। यदि क्वचित् त्रुटिः स्यात् तदा तत्प्रत्यवायप्रायश्चित्यर्थं सारस्वतीनामधेयां पापमार्जनीमिष्टिं कर्तुं याज्ञिका उपदिदिशुः। 'आहिताग्निरपशब्दं प्रयुज्य प्रायश्चित्तीयां सारस्वतीमिष्टिं निर्वपेत्। प्रायश्चित्तीया मा भूम इत्यध्येयं व्याकरणम्' (पतञ्जलिः, २०४०, पृ.२९)।

***दशम्यां पुत्रस्य***

जातस्य पुत्रस्य एकादशाहे नामसंस्कारः कर्तव्यः। नामकर्मणि च आदौ घोषप्रयत्नवद्वर्णं मध्ये अन्तःस्थसंज्ञकमवृद्धं–(वृद्धिर्यस्याचामादिस्तद्वृद्धम्–(अ.सू.१/१/७३) आऐऔकाररहितं(आरामप्रसादः, ऐक्यनाथः औमकान्त इत्यादिरहितम्) पूर्वजनानां त्रिपुरुषाणां मध्ये कस्यापि स्मारकं शत्रुवर्गेष्वप्रसिद्धं (रावणः, कंसः, जरासन्धः, शिशुपालः, हिरण्याक्षः, हिरण्यकशिपुः, पूतना, शूर्पणखादिवर्जं) द्व्यक्षरं हरिः, रामः, कृष्णः, श्यामः, सती, सीता, राधा, उमा, गौरी, तारा इत्यादिवत्, चतुरक्षरं– नवराजः, नारायणः, वासुदेवः, घनश्यामः, जनार्दनः, सरस्वती, अरुन्धती, पूर्णकला, इत्यादिवत्, कृदन्तं (कृत्प्रत्ययान्तं) रामः, कृष्णः, जनार्दनः, रमा इत्यादिवत्, तद्धितप्रत्ययान्तं न कर्तव्यम्। ( कार्ष्णिः, रामीयः, घानश्यामिः, सैतेयः, राधेयसदृशान् शब्दान् विहाय नाम निर्धारणीयम्।) उक्तं च– 'दशम्युत्तरकालं पुत्रस्य जातस्य नाम विदध्यात्। घोषवदाद्यन्तरन्तःस्थमवृद्धं त्रिपुरुषानूकमनरिप्रतिष्ठितम्, तद्धिप्रतिष्ठिततमं भवति। द्व्यक्षरं चतुरक्षरं वा नाम कृतं कुर्यान्न तद्धितम्' (पतञ्जलिः, २०४०, पृ.२९)। शास्त्रनिर्देशानुसारं नामकरणादौ समर्था भवेम इत्यध्येयं व्याकरणम्।

***सुदेवो असि वरुण***

व्याकरणशास्त्रे प्रयुक्ताः प्रथमादयः सप्तविभक्तयः सप्तसिन्धुरूपेण कल्पिताः सन्ति। यथा अग्निर्धातुनिर्मिताया मूर्तेः विवरान्तः प्रविश्य तत्रस्थं मलं भस्मीकृत्य निर्मलीकरोति तथा सप्तविभक्तयोऽपि मानवस्य कण्ठताल्वाद्युच्चारणस्थानेभ्यः समुद्धूय शब्ददोषं निराकृत्य संस्कुर्वन्ति। तथा चोक्तम्–'सुदेवो असि वरुण यस्य ते सप्तसिन्धवः। अनुक्षरन्ति काकुदं सूर्म्यं सुषिरामिव।' (पतञ्जलिः, २०४०, पृ.३०)। सप्तसमुद्रपरिवेष्टितेन वरुणेन इव प्रतिष्ठां लब्धुं सप्तविभक्तिपरिष्कृतं व्याकरणशास्त्रमध्येयम्।

## निष्कर्षः

उपरितननिर्दिष्टदिशा व्याकरणमहाभाष्यप्रणेत्रा भगवता पतञ्जलिना प्रदर्शितेषु व्याकरणशास्त्राध्ययनस्य प्रयोजनेषु मध्ये साधुशब्दज्ञानं व्याकरणाध्ययनस्य साक्षात्प्रयोजनमेकमेव, रक्षोहागमलघ्वसन्देहा इति पञ्च मुख्यप्रयोजनानि तथा तेऽसुरा इत्यादयो गौणप्रयोजनानि त्रयोदश सन्ति। एवं सर्वेषां प्रयोजनानां सम्मेलनात् प्रयोजनानां सङ्ख्या ऊनविंशतिर्भवति। वेदस्य रहस्यभूत-विशालसंस्कृतवाङ्मयस्य सम्यग्ज्ञानाय तद्रक्षणाय च पाणिनीयं व्याकरणमध्येतव्यमिति व्याकरणाध्ययनस्योक्त-प्रयोजनानीति निष्कर्षः।

## कृतज्ञताज्ञापनम्

प्रस्तुतेऽस्मिनालेखे महाभाष्यदिशा शब्दसाधुत्वप्रतिपादकस्य व्याकरणशास्त्रस्याध्ययनप्रयोजनविवेचन-क्रमेऽनुसन्धानात्मकालेखगतप्रविध्यादिविषये च परामर्शदातृभ्यो विद्वद्भ्यो धन्यवादं प्रकटयामि। आलेखमिदमाद्यन्तं सूक्ष्मेक्षिकया सम्परीक्ष्य यथावश्यकम् परामर्शदातृभ्यो गुरुभ्योऽपि सप्रणतिं हार्दिकीं कृतज्ञतां व्यनज्मि।

## सन्दर्भग्रन्थसूची

पतञ्जलिः, (२०४०). *व्याकरणमहाभाष्यम्* (प्रदीपोद्योततत्त्वालोकसमुल्लसितम्) वाराणसीः चौखम्बासंस्कृतसंस्थानम्।

पाणिनिः, (१९७८). *पाणिनीयशिक्षा,* (आभाहिन्दिव्याख्याविभूषिता,व्या.श्रीनारायण मिश्रः) वाराणसी चौखम्बा ओरियन्टालिया।

पाण्डेयः, नवराजः (२०६८). *परमानन्दचरितामृतम्,* तनहूँ हरिहर सन्न्यास आश्रम, देवघाटधाम।

भट्टः, नागेशः (१९९१). *परमलघुमञ्जूषा,* (किरणावली संस्कृतव्याख्योपेतहिन्द्यनुवादसिता, व्या.आचार्यलोकमणिदाहालः), वाराणसीः चौखम्बा सुरभारतीप्रकाशनम्।

भट्टोजिदीक्षितः (२०७३). *वैयाकरणसिद्धान्तकौमुदी,* (स्वरवैदिकप्रकरणम्, व्या. नवराजपाण्डेयः) तनहूँ हरिहर सन्न्यास आश्रम, देवघाटधाम।

............(२०३४). *वैयाकरणसिद्धान्तकौमुदी*, वाराणसी : चौखम्बा संस्कृत सीरिज आफिस।

भर्तृहरिः, (१९८७). *वाक्यपदीयम्*, (सम्पा. सत्यनारायण शास्त्री खण्डूडी) वाराणसीः कृष्णदास अकादमी।

वेदव्यासः, (२०६७). *श्रीमद्भागवतमहापुराणम्*, (मूलमात्रम्) गोरखपुरः गीताप्रेसः।

............ (२०७२). *महाभारतम्* (शान्तिपर्व) गोरखपुर : गीताप्रेसः।

.........*श्रीमद्भगवद्गीता*, (२०६१) गोरखपुर : गीताप्रेसः।